Index Verborum to the Nyāyabindu, Tib-Sanskrit and Sanskrit-Tib. compiled by E. Obermiller, Bib. Bud.

Index to the Madhyamika Kārikas compiled N. A. Sastri Tib.-Skt. (unpublished.)

Index Verborum to the Śalistamba Sūtra, etc. Chinese-Sanskrit, compiled by N. A. Sastri (unpublished).

Index Verborum to the Sānkhyakārikas, Chin.-Skt. with all technical terms collected from the commentary thereon, Chin.-Skt. compiled by N. A. Sastri. (unpublished).

Khotanese Documents from the Chinese Turkestan, A Translation of—T. Burrow, R A S. London. 1940 (James G. Forlong Fund, XX).

Lexique; Deux Lexiques Sanskrit-Chinois, ed. P. C. Bagchi, Cal. Univ. 1, 1929, II, 1937.

Traité d'Aryadeva sur Le "Nirvāṇa" des Heretiques, G. Tucci, Toung Pao, 2 series, Vol. XXIV, 1926, pp. 166 ff.

Twelve years of the wandering life of Buddha, Chin. Eng. tr. P. C. Bagchi, JGIS. X, pp. 1-47.

Two Buddhist books: (1) The vow of Samantabhadra, (2) An outline of the Land doctrine, Eng. tr. Miss P. C. Lee, Hongkong.

N. A. Sastri

P. S. Abhidharmasamuccaya of Asanga, Fragments from—, ed. V. V. Gokhale, RAS. Bombay branch, 1947. Eight fragments are published. The editor promised to restore the rest.

ABBREVIATIONS

BB. = Bibliotheca Buddhica.

BEFEO = Bulletin de l'Ecole Francaise d'Extreme Orient.

BI. = Bibliotheca Indica.

BSOS = Bulletin of the School of Oriental Studies, London Institute

GOS = Gaekwad's Oriental Series, Baroda.

IC = Indian Culture, Calcutta.

Ind. Ant = Indian Antiquary.

IHQ = Indian Historical Quarterly, Calcutta.

JA = Journal Asiatique, Paris.

JASB = Journal of Asiatic Society of Bengal, Calcutta.

JGIS = Journal of Greater India Society, Calcutta.

JRAS = Journal of Royal Asiatic Society of Great Britain and Ireland.

SBA = Sitzungserichte der Preussischen Akademie der Wissenschaften in Berlin.

Zii = Zeitschrift fur Indologie und Iranistik, heransg, von der Deutschen Movgen Landischen Grosellschaft.

Chin and Tib. Eng. tr = Translated into English from the Chinese and Tibetan versions by.

Disc. = discussed by.

Rest. = restored by.

SAMSKṚTA TEXTS

ADDITIONS AND ALTERATIONS

[The beginning portion of the Sutra is cited in the Abh. Kos'avyākhyā III, p. 48]

एवं मया श्रुतमित्यादि । भगवान् राजगृहे विहरति ग्रध्रकूटे पर्वते महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिः भिक्षुशतैः संबहुलैश्च बोधिसत्त्वैरिति । आयुष्मान् शारिपुत्रो मैत्रेयबोधिसत्त्वमेतदवोचत् । शालिस्तम्बमवलोक्य भिक्षुभ्यः सूत्रमिदमुक्तम् । यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति । यो धर्मं पश्यति स बुद्धं पश्यति इत्युक्त्वा भगवान् तूष्णीं बभूव । तदस्य भगवता भाषितस्य सूत्रस्य कोऽर्थः । प्रतीत्यसमुत्पादः कतमः । धर्मः कतमः । बुद्धः कतमः । कथं च प्रतीत्यसमुत्पादं पश्यन् धर्मं पश्यति इत्यादि । तत्र प्रतीत्यसमुत्पादो नाम यदिदमविद्येत्यादि । (इदंश्चाभिसन्धायेदमुक्तं तत्र सूत्रे) उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवेयं धर्मता धर्मस्थितिता धर्मनियामता तथाता अवितथता अनन्यतथता भूतता सत्यता तत्त्वमविपरीतता अविपर्यस्तता इत्येवमादि भगवन्मैत्रेयवचनम् ।

P. 18-19, 2.

This idea is confirmed in the Abh. Kos'a, III. 25 c-d:
पूर्वापरान्तमध्येषु संमोहविनिवृत्तये ॥

P. 26, l. 9-11. Read:

अप्रतिष्ठिते पृथिवीप्रदेशे . . . स ब्राह्मं पुण्यं प्रसवति ॥ cf. the Sūtra cited in the Kos'avyā. p. 438, 4.

आर्य

शालिस्तम्बसूत्रम्

नमस्सर्वबुद्धबोधिसत्वेभ्यः

एवं मया श्रुतम् । एकस्मिन् समये भगवान् राजगृहे विहरति स्म गृध्रकूटे महता भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः संबहुलैश्च बोधिसत्त्वमहासत्त्वैः । अथायुष्मान् शारिपुत्रो येन मैत्रेयबोधिसत्त्वस्य महासत्त्वस्य चङ्क्रमः[1] तेनोपसमक्रामीत् । उपसंक्रम्य अन्योन्यं संमोदनीयां कथां बहुविधां [2]व्यतिसारयित्वा उभौ शिलातले उपाविशताम् ॥

[3]अथायुष्मान् शारिपुत्रः मैत्रेयं बोधिसत्त्वं महासत्त्वमेतदवोचत् । अद्यात्र शालिस्तम्बमवलोक्य मैत्रेय भगवता भिक्षुभ्यस्सूत्रमिदमुक्तम् । यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति । स धर्मं पश्यति । यो धर्मं पश्यति स बुद्धं पश्यति । इत्युक्त्वा भगवान् तूष्णीं बभूव[3] । अथ मैत्रेय सुगतोक्त-

[1] *i.e.* विहारभूमिः । Tib. *Byams. pai. bgrod. par. bya. bai. sa. phyogs.* cp. Vin. Texts (S. B. E.) II, pp. 7, 390, n. 4.

[2] Pali expression : संमोदनीयं कथं सारनीयं वीतिसारेत्वा—, *e.g.*, in the Maj. I. (27) p. 178.

[3-3] These sentences are reproduced in the Abh. Kośavyākhyā *ad* III, 28, N. Dutt's ed. p. 48. See L. V. Poussin's note in his edition of Mad. vṛtti, p. 6, n. 2. The phrase यः प्रतीत्यसमुत्पादं etc., is oft-quoted

सूत्रान्तार्थः कतमः । प्रतीत्यसमुत्पादः कतमः । धर्मः कतमः । बुद्धः कतमः । कथं प्रतीत्यसमुत्पादं पश्यन् धर्मं पश्यति । कथं धर्मं पश्यन् बुद्धं पश्यति ।

[4]एवमुक्ते मैत्रेयो बोधिसत्त्वो महासत्त्व आयुष्मन्तं शारद्वतीपुत्रमेतदवोचत् । अत्र यदुक्तं भदन्त शारिपुत्र भगवता धर्मस्वामिना सर्वज्ञेन । यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति । यो धर्मं पश्यति स बुद्धं पश्यति । इति । तत्र कतमः प्रतीत्य[Tib. f. 191^b] समुत्पादो नाम । प्रतीत्यसमुत्पादो नाम यदिदम् [5]अस्मिन् सति इदं भवति । अस्योत्पादादिदमुत्पद्यते । यदुत अविद्याप्रत्ययाः संस्काराः । संस्कारप्रत्ययं विज्ञानम् । विज्ञानप्रत्ययं नामरूपम् । नामरूपप्रत्ययं षडायतनम् । षडायतनप्रत्ययः स्पर्शः । स्पर्शप्रत्यया वेदना । वेदनाप्रत्यया तृष्णा । तृष्णाप्रत्ययमुपादानम् । उपादानप्रत्ययो भवः । भवप्रत्यया जातिः । जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति । एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति । तत्राविद्यानिरोधात्

as āgama in the Bud. Sanskrit literature ; *e.g.*, Mad. vritti, p. 160, 6 ; and Bhavya's Karatalaratna, p. 39, Visvabh. Stud. 9.

[4-4] This portion is cited in Bod. car. pañ. p. 386—p. 387 omitting अस्मिन् सति . . . उत्पद्यते ।

[5] This is frequently referred to in the Bud. Literature both in Pali and Sanskrit. Its Pali form is : इमस्मिं सति इदं होति । इमस्सुप्पादा इदं उप्पज्जति । इमस्मिं असति इदं न होति । इमस्स निरोधा इदं निरुज्झति । Nidānasamyutta in Sam. II, pp. 28, 65, 78, 85, Majjhima. N. III, p. 63. Other references : Mahāvastu II, p. 285 ; Mad. vṛtti, p. 9 with note 7 ; Bodhic. pañ. p. 182 ; Dharmapāla's comm. on Ālambanaparikṣā ed. by me, pp. 28 (आगम उक्तम् अस्मिन् सति इदं भवति इति प्रतीत्यसमुत्पदस्याभिधानम् इति), 68 ; My Central Teachings of Maṇimekhalai § 4, III.

It is also referred to as Dharmasaṅketa in the Bod. car. panjikā. p. 414, 18.

See Buddha's teaching this dharma to Udāyin, Maj. II, p. 32.

संस्कारनिरोधः । संस्कारनिरोधाद् विज्ञाननिरोधः । विज्ञाननिरोधान् नामरूपनिरोधः । नामरूपनिरोधात् षडायतननिरोधः । षडायतननिरोधात् स्पर्शनिरोधः । स्पर्शनिरोधाद् वेदनानिरोधः । वेदनानिरोधात् तृष्णानिरोधः । तृष्णानिरोधाद् उपादाननिरोधः । उपादाननिरोधाद् भवनिरोधः । भवनिरोधाज् जातिनिरोध· । जातिनिरोधाज् जरामरण[Tib. f. 192a]शोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते । एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति । अयमुच्यते प्रतीत्यसमुत्पादो[4] भगवता । कतमो धर्मः । आर्याष्टाङ्गिको मार्गः तद्यथा सम्यग् दृष्टिः सम्यक् संकल्पः सम्यग् वाक् सम्यक् कर्मान्तः सम्यगाजीवः सम्यग् व्यायामः सम्यक् स्मृतिः सम्यक् समाधिः । अयमुक्तो भगवता आर्याष्टाङ्गिको मार्गः फललाभनिर्वाणैकसंगृहीतो धर्मः । तत्र कतमो बुद्धो भगवान् । यः सर्वधर्मावबोधाद्बुद्ध उच्यते स आर्यप्रज्ञानेत्रः धर्मकायसमन्वितः शैक्षाशैक्षधर्मानिमान् पश्यति । [6]तत्र कथं प्रतीत्यसमुत्पादं पश्यति । इहोक्तं भगवता । [6a]य[इमं] प्रतीत्य[f. 192b]समुत्पादं[7] सततसमितम् अजीवं निर्जीवं यथावदविपरीतमजातमभूतमकृतमसंस्कृतमप्रतिघमनालम्बनं शिवमभयमनाहार्यमव्यय[8]मव्युपशमस्वभावं पश्यति । [स धर्मं पश्यति ।] यस्तु [9]एवं धर्मं सततसमितमजीवं निर्जीवं यथावदविपरीतमजातमभूतमकृतमसंस्कृतमप्रतिघमनालम्बनं शिवममनाहार्यमव्ययमव्युपशमस्वभावं [10]पश्यति । सोऽनु[11]त्तरधर्मशरीरं बुद्धं पश्यति । आर्य-

[6-6] Cited in Bod. car. pañ· pp· 576-577.

[6a] Cited also, *Ibid.*, p. 387, ll. 8-12.

[7] This formula is also repeated in the last para of this Sūtra.

[8] Omitted in Tib.

[9] Bod. car. reads simply एवं । Tib. seems to read : एवंविधं धर्ममपि सततसमित . . .

[10] Ibid, shortened : निर्जीवमित्यादि पूर्ववत् । यावदव्युपशमस्वभावं पश्यति ।

[11] Tib. construes this sentence thus : स आर्यधर्ममभिसंबुध्य सम्यग्ज्ञानोपनयेन अनुत्तरधर्मशरीरं बुद्धं पश्यति ।

धर्माभिसमये [12]सम्यग्ज्ञानोपनयेनैव । प्रतीत्यसमुत्पाद इति कस्मादुच्यते । सहेतुकः सप्रत्ययो नाहेतुको नाप्रत्ययः । तस्मात् प्रतीत्यसमुत्पाद इत्युच्यते[6] । तत्र भगवता प्रतीत्यसमुत्पादलक्षणं संक्षेपेणोक्तम् । इदंप्रत्यय- [f. 193a]ताफलमुत्पादाद्वा [13]तथागतानामनुत्पादाद्वा स्थितैवेषां धर्माणां धर्मता यावद्वैषा धर्मता धर्मस्थितता धर्मनियामता प्रतीत्यसमुत्पादसमता तथता अविपरीततथता अनन्यतथता भूतता सत्यता अविपरीतता अविपर्ययता इति ॥

[14]अथ च पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां [कारणाभ्याम्] उत्पद्यते। कतमाभ्यां द्वाभ्याम् । यदिदं हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च । सोऽपि द्विविधो द्रष्टव्यः बाह्यश्चाध्यात्मिकश्च । तत्र बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः कतमः । यदिदं बीजादङ्कुरः । अङ्कुरात् पत्रम् । पत्रात् काण्डम् । काण्डान्नालम् । नालाद्गण्डः[15] । गण्डाद्गर्भम् । गर्भाच्छूकः[16] । शूकात्पुष्पम् । पुष्पात् फलम् । असति बीजेऽङ्कुरो न भवति । यावदसति पुष्पे फलं न भवति । सति तु बीजेऽङ्कुरस्याभिनिर्वृत्तिर्भवति । एवं यावत्सति पुष्पे[f. 193b]फलस्याभिनिर्वृत्तिर्भवति । तत्र बीजस्य नैवं भवति अहमङ्कुरमभिनिर्वर्तयामीति । अङ्कुरस्यापि नैवं भवति अहं बीजेनाभि-

[12] Bod. car.: ज्ञानादुप . . .

[13] The shorter form of this formula is oft-repeated in the other canonical works, लङ्कावतारसूत्र (Tokio) p. 144, 218, etc. Kumārila also refers to it in his Tantravārtika, p. 163, and further see Mad. vṛtti, p. 40 and L. V. Poussin's extensive note upon it. Cp. Bod. pañ. p. 588. also.

[14] Bod. car. pañjikā, pp. 577-579 quotes from this to the end of बाह्यप्रतीत्यसमुत्पाद.

[15] गण्डः । गण्डात् omitted in Tib.

[16] शूकः । शूकात् omitted in Tib.

निर्वर्त्तित इति । एवं यावत् पुष्पस्य नैवं भवति अहं फलमभिनिर्वर्तयामीति । फलस्यापि नैवं भवति अहं पुष्पेणाभिनिर्वर्त्तितमिति । अथ पुनर्बीजे सति अङ्कुरस्याभिनिर्वृत्तिर्भवति प्रादुर्भावः । एवं यावत्पुष्पे सति फलस्याभिनिर्वृत्तिर्भवति प्रादुर्भावः । एवं बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धो द्रष्टव्यः ।

कथं बाह्यस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः । षण्णां धातूनां समवायात् । कतमेषां षण्णां धातूनां समवायात् । यदिदं पृथिव्यप्तेजोवाय्वाकाशऋतुधातु[17]समवायाद् बाह्यस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः । तत्र पृथिवीधातुर्बीजस्य संधारणकृत्यं करोति । अब्धातुर्बीजं स्नेहयति । तेजोधातुर्बीजं परिपाचयति । वायुधातु- [f. 194a] र्बीजमभिनिर्हरति । आकाशधातुर्बीजस्यानावरणकृत्यं करोति । ऋतुरपि बीजस्य परिणामनाकृत्यं करोति । असत्स्वेषु प्रत्ययेषु बीजादङ्कुरस्याभिनिर्वृत्तिर्न भवति । यदा बाह्यश्च पृथिवीधातुरविकलो भवति । एवमप्तेजोवाय्वाकाशऋतुधात[18]वश्चाविकला भवन्ति । ततः सर्वेषां समवायाद् बीजे निरुध्यमाने [19]ततः अङ्कुरस्याभिनिर्वृत्तिर्भवति । तत्र पृथिवीधातोर्नैवं भवति अहं बीजस्य संधारणकृत्यं करोमीति । एवमब्धातोरपि नैवं भवति अहं बीजं स्नेहयामीति । तेजोधातोरपि नैवं भवति अहं बीजं परिपाचयामीति । वायुधातोरपि नैवं भवति अहं बीजमभिनिर्हरामीति । आकाशधातोरपि नैवं भवति अहं बीजस्यानावरणकृत्यं करोमीति । ऋतोरपि नैवं भवति अहं बीजस्य परिणामनाकृत्यं करोमीति । बीजस्यापि नैवं भवति अहं बीजमभिनिर्वर्तयामीति । अङ्कुर-

[17] धातु omitted in Bod.

[18] Tib. omits धातु.

[19] Bod. omits ततः

स्यापि नैवं भवति अह[f. 194b]मेभिः प्रत्ययैरभिनिर्वर्त्तित इति । अथ पुनः सत्स्वेतेषु प्रत्ययेषु बीजे निरुध्यमानेऽङ्कुरस्याभिनिर्वृत्तिर्भवति । एवं[20] यावत् पुष्पे सति फलस्याभिनिर्वृत्तिर्भवति । स चाङ्कुरो न स्वयंकृतो न परकृतो नोभयकृतो नेश्वरकृतो न कालपरिणमितो न प्रकृतिसंभूतो[[21]नचैककारणाधीनो] नाप्यहेतुसमुत्पन्नः । अथ पुनः पृथिव्यप्तेजोवाय्वाकाशऋतु-[17]धातुसमवायाद् बीजे निरुद्ध्यमाने अङ्कुरस्याभिनिर्वृत्तिर्भवति । एवं बाह्यस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः ।

तत्र बाह्यः प्रतीत्यसमुत्पादः पञ्चभिराका[22]रैर्द्रष्टव्यः । कतमैः पञ्चभिः । न शाश्वततः नोच्छेदतः न संक्रान्तितः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः तत्सदृशानुप्रबन्धतश्चेति । कथं न शाश्वतत इति । यस्मादन्योऽङ्कुरः अन्यद्बीजम् । न च य एवाङ्कुरः तदेव बीजम् । न[23] च निरुद्धाद्बीजादङ्कुर उत्पद्यते । नाप्यनिरुद्धात्[23] । बीजं पुनर्निरुध्यते । तदैवाङ्कुरश्चो-[f. 195a]त्पद्यते । तस्मान् न शाश्वततः । कथं नोच्छेदतः । न च पूर्वनिरुद्धाद्बीजाद ङ्कुरो निष्पद्यते । नाप्यनिरुद्धाद्बीजात्[24] । अपि च बीजं च निरुध्यते । तस्मिन्नेव समयेऽङ्कुर उत्पद्यते तुलादण्डोन्नामावनामवत् । अतो नोच्छेदतः । कथं न संक्रान्तितः । [25]विसदृशो बीजादङ्कुर इति । अतो न संक्रान्तितः । कथं परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः ।

[20] This sentence omitted in Bod.

[21] Omitted in Tib.

[22] Bod. reads कारणैः

[23-23] This portion omitted in Bod.

[24] बीज omitted in Tib.

[25] So reads Bod. But Tib. reads : यस्मादन्योऽङ्कुरोऽन्यद्बीजम् । न च य एवाङ्कुर स्तदेव बीजम् । Note this explanation is also given in connection with न शाश्वततः ।

परीत्तं बीजमुप्यते विपुलफलमभिनिर्वर्तयतीति । अतः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः । [26]कथं तत्सदृशानुप्रबन्धतः । यादृशं बीजमुप्यते तादृशं फलमभिनिर्वर्तयतीति । अतस्तत्सदृशानुप्रबन्धतश्चेति । एवं बाह्यः प्रतीत्यसमुत्पादः पञ्चभिराका[22]रैर्द्रष्टव्यः[27] ।

[28]एवमाध्यात्मिकोऽपि प्रतीत्यसमुत्पादो द्वाभ्यां [कारणाभ्या]मुत्पद्यते । कतमाभ्यां द्वाभ्याम् । यदिदं हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च ।

[29]तत्राध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः कतमः । यदिदमविद्याप्रत्ययाः संस्काराः यावज्जातिप्रत्ययं [30]जरामरणम् इति ।[f. 195b] अविद्या चेन्नाभविष्यत् नैव संस्काराः प्रज्ञास्यन्ते । एवं यावज्जातिश्चेन्नाभविष्यत् जरामरणं न प्रज्ञास्यते । [31]अथ सत्यामविद्यायां संस्कारणामभिनिर्वृत्तिर्भवति । एवं यावज् जात्यां सत्यां जरामरणस्याभिनिर्वृत्तिर्भवति । तत्राविद्याया नैवं भवति अहं संस्कारानभिनिर्वर्तयामीति । संस्काराणामपि नैवं भवति वयमविद्ययाभिनिर्वर्तिता इति । एवं यावज् [32]जातेरपि नैवं भवति अहं जरामरणमभिनिर्वर्तयामीति । जरामरणस्यापि नैवं भवति अहं जात्याभिनिर्वर्तितमिति । अथ च सत्यामविद्यायां संस्काराणामभिनिर्वृत्ति-

[26] कथं त . . . बन्धतः omitted in Tib.

[27] End of the explanation of बाह्यप्रतीत्यसमुत्पाद. The full text of this portion is cited in Bod. car. pañjikā as stated above, see Note 14.

[28] Candrakīrti quotes a larger extract from this Sūtra covering the whole explanation of आध्यात्मिकप्रतीत्यसमुत्पाद in his Madhyamakavṛtti (abbreviated MV. below) ed. L. V. Poussin, pp. 560-570.

[29] S'āntideva also draws a similar extract from this almost to the end of Sūtra, in his Sikṣāsamuccaya (abbreviated S'S. below) ed. C. Bendall, pp. 219-227.

[30] MV. repeats the formula fully.

[31] MV. अथ वा.

[32] S'S. जात्याः

र्भवति प्रादुर्भावः। एवं यावज् जात्यां सत्यां जरामरणस्याभिनिर्वृत्तिर्भवति प्रादुर्भावः। एवमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धो द्रष्टव्यः।

कथमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः। षण्णां धातूनां समवायात्। कतमेषां षण्णां धातूनां समवायात्। यदिदं पृथिव्यप्तेजोवाय्वाकाशविज्ञान[f. 196a]धातूनां समवायाद् आध्यात्मिकस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः। तत्राध्यात्मिकस्य प्रतीत्यसमुत्पादस्य पृथिवीधातुः कतमः। योऽयं कायस्य [33]संश्लेषतः कठिनभावमभिनिर्वर्तयति। अयमुच्यते पृथिवीधातुः। यः कायस्यानुपरिग्रह-[34]कृत्यं करोति। अयमुच्यतेऽब्धातुः। यः कायस्य अशितपीतभक्षितं परिपाचयति। अयमुच्यते तेजोधातुः। यः कायस्य आश्वासप्रश्वासकृत्यं करोति अयमुच्यते वायुधातुः। यः कायस्यान्तः [35]सौषिर्यमभिनिर्वर्तयति अयमुच्यत आकाशधातुः। यः कायस्य नामरूपाङ्कुरमभिनिर्वर्तयति नडकलापयोगेन, पञ्चविज्ञानकायसंयुक्तं सास्रवं च [36]मनोविज्ञानम्, अयमुच्यते विज्ञानधातुः। [37]तत्रासतामेषां प्रत्ययानां कायस्योत्पत्तिर्न भवति। यदा आध्यात्मिकः पृथिवीधातुरविकलो भवति, एवमप्तेजोवाय्वाकाशविज्ञानधातवश्चाविकला भवन्ति, ततः सर्वेषां समवायात् कायस्याभि[f. 196b]निर्वृत्तिर्भवति। तत्र पृथिवीधातोर्नैवं भवति अहं कायस्य संश्लेषतः कठिनभावमभिनिर्वर्तयामीति। अब्धातोर्नैवं भवति अहं कायस्यानुपरिग्रहकृत्यं

[33] MV. यः कायस्य संश्लेषात्.

[34] S'S. अनुपरिग्रहं कृत्यं . . .

[35] S'S. सौषिर्यभावम्.

[36] Tib. adds यन्मनो . . . *yid. kyi. rnam. par. s'es. pa. gaṅ. yin. pa.*

[37] S'S. असत्सु प्रत्ययेषु. Tib. and S'S. omit तत्र.

करोमीति । तेजोधातोरपि नैवं भवति अहं कायस्याशितपीतभक्षितं[38] परिपाचयामीति । वायुधातोर्नैवं भवति अहं कायस्याश्वासप्रश्वासकृत्यं करोमीति । आकाशधातोर्नैवं भवति अहं कायस्यान्तः सौषिर्यमभिनिर्वर्तयामीति[39] । विज्ञानधातोर्नैवं भवति [40]अहं कायस्य नामरूपमभिनिर्वर्तयामीति । कायस्यापि नैवं भवति[40] अहमेभिः प्रत्ययैर्जनित इति । अथ च [41]सत्स्वेषु प्रत्ययेषु कायस्योत्पत्तिर्भवति ।

तत्र पृथिवीधातुर्नात्मा न सत्त्वो न जीवो न जन्तुर्न मनुजो न मानवो न स्त्री न पुमान् न नपुंसकं न चाहं न मम न चान्यस्य कस्यचित् । एवमब्धातु[Tib. 197a]स्तेजोधातुर्वायुधातुराकाशधातु[42]र्विज्ञानधातुर्नात्मा न सत्त्वो न जीवो न जन्तुर्न मनुजो न मानवो न स्त्री न पुमान् न नपुंसकं न चाहं न मम न चान्यस्य कस्यचित् ॥

[43]तत्राविद्या कतमा । यैषामेव[44] षण्णां धातूनामेकसंज्ञा पिण्डसंज्ञा नित्यसंज्ञा ध्रुवसंज्ञा शाश्वतसंज्ञा सुखसंज्ञा आत्मसंज्ञा [45]सत्त्वजीवजन्तुपोषपुरुषपुद्गलसंज्ञा मनुजमानवसंज्ञा अहंकारममकारसंज्ञा । एवमादि विविधमज्ञानमियमुच्यतेऽविद्येति । एवमविद्यायां सत्यां विषयेषु रागद्वेष-

[38] MV. and S'S. : खादित.

[39] MV. after this adds: ऋतोरपि नैवं भवति अहं कायस्य परिणामनाकृत्यं करोमीति.

[40-40] Omitted in S'S.

[41] MV. अथ च पुनस्सतामेषां प्रत्ययानां समवायात् . . .

[42] ऋतुधातुः added in MV.

[43] The following passage is also cited in the Bodhicar. pañjikā, pp. 387-389.

[44] Bod. एतेषां . . . । S'S. य एष्वेव षट्सु धातुषु . . . ।

[45] S'S. सत्त्वजीवमनुजमानवसंज्ञा अहंकार . . . । MV. सत्त्वसंज्ञा जीवपुद्गलमनुजमानवसंज्ञा अहंकार . . . । Bod. सत्त्वसंज्ञा जीव-जन्तु-मनुज-मानव-अहंकारममकारसंज्ञा ।

मोहाः प्रवर्तन्ते । तत्र ये रागद्वेषमोहा विषयेष्व[Tib 197.b]ष्वमी [अविद्याप्रत्ययाः] संस्कारा इत्युच्यन्ते । वस्तुप्रतिविज्ञप्तिर्विज्ञानम् । विज्ञान-सहभुवश्चत्वारः स्कन्धा अरूपिण उपादानाख्यास्तन्नाम रूपं चत्वारि महाभूतानि तानि चोपादाय रूपं, तच्च नाम तच्च रूपमैकध्यमभिसंक्षिप्य तन्नाम[46]रूपम् । नामरूपसंनिश्रितानीन्द्रियाणि षडायतनम् । त्रयाणां धर्माणां संनिपातः स्पर्शः । स्पर्शानुभवो[47] वेदना । वेदनाध्यवसानं तृष्णा । तृष्णावैपुल्यमुपादानम् । उपादाननिर्जातं पुनर्भवजनकं कर्म भवः । [48]भवहेतुकः स्कन्धप्रादुर्भावो जातिः । जातस्य स्कन्धपरिपाको जरा[49] । जीर्णस्य स्कन्धस्य विनाशो मरणम्[50] । म्रियमाणस्य संमूढस्य साभिष्वङ्ग-स्यान्तः[51] परिदाहः शोकः । शोकोत्थमालपनं परिदेवः[52] । पञ्चविज्ञान-कायसंयुक्तमसा[53]तमनुभवनं दुःखम् । [54]मनसिकारसंयुक्तं मानसं दुःखं दौर्मनस्यम् । ये चाप्यन्य एवमादय उपक्लेशास्त उपायासा इति ।

[46] So MV. But S'S. विज्ञानसहजाश्चत्वारोऽरूपिण उपादानस्कन्धा स्तन्नाम [रूपं] चत्वारि च महाभूतानि चोपदाय उपादायरूपमैकध्यमभिसंक्षिप्य तन्नामरूपम् । Bod. चत्वारि महाभूतानि चोपादानानि रूपमैकध्यरूपम् ! विज्ञानसहजा श्चत्वारोऽरूपिण उपादानस्कन्धा नाम । तन्नामरूपम् । Tib. has much simplified the sentence thus: विज्ञानसहजाश्चत्वार उपादानस्कन्धा स्तन्नामरूपम् ।

[47] S'S. भवना ।

[48] Tib. तद्धेतुकः ।

[49] S'S. स्कन्धपरिपाको जरा । Bod. जात्यभिनिर्वृत्तानां स्कन्धानां परिपाको जरा ।

[50] S'S. विनाशो मरणम् । Bod. स्कन्धवि . . . ।

[51] S'S. Bod. and MV. अन्तर्दाहः ।

[52] S'S. लालप्यमानं परिदेवः । Bod. शोकोत्थलपनं . . . ।

[53] S'S. अशातम् ।

[54] MV. मनसा संयुक्तम् । Bod. दुःखमनसिकारसंप्रयुक्तम् । S'S. मनसिकारसंप्रयुक्तम् ।

[55]तत्र महान्[56]धकारार्थेनाविद्या । अभिसंस्कारार्थेन संस्काराः । [57]विज्ञापनार्थेन विज्ञानम् । [[58]अन्योन्यो]पस्तम्भनार्थेन[Tib. 198a]नामरूपम् । [59]आयद्वारार्थेन षडायतनम् । स्पर्शनार्थेन स्पर्शः । अनुभवनार्थेन वेदना । परितर्षणार्थेन तृष्णा । उपादानार्थेन उपादानम् । [60]पुनर्भवजननार्थेन भवः । [61]स्कन्धप्रादुर्भावार्थेन जातिः । [62]स्कन्धपरिपाकार्थेन जरा । विनाशार्थेन मरणम् । शोचनार्थेन शोकः । [63]वचनपरिदेवनार्थेन परिदेवः । कायसंपीडनार्थेन दुःखम् । चित्तसंपीडनार्थेन दौर्मनस्यम् । [64]उपक्लेशार्थेन उपायासाः[65] ।

[66]पुनरपरं तत्त्वेऽप्रतिपत्तिर्मिथ्याप्रतिपत्तिरज्ञानमविद्या । एवमविद्यायां सत्यां त्रिविधाः संस्कारा अभिनिर्वर्तन्ते । पुण्योपगा अपुण्योपगा आनेञ्ज्योपगाः । तत्र पुण्योपगानां संस्काराणां पुण्योपगमेव विज्ञानं भवति । अपुण्योपगानां संस्काराणामपुण्योपगमेव विज्ञानं भवति । आनेञ्ज्योपगानां संस्काराणामानेञ्ज्योपगमेव विज्ञानं [Tib. 198b] भवति । इदमुच्यते

[55] This para is omitted and abbreviated by ॥ पे ॥ in S'S.

[56] MV. मोहा . . . ।

[57] Bod. विज्ञानन . . . ।

[58] Omitted in Tib. Bod. मननार्थेन . . . ।

[59] Bod. आपद्वारा . . . । Tib. *skye. bai. sgoi. phyir*, lit. जन्मद्वारार्थेन ।

[60] MV. पुनर्भवार्थेन ।

[61] MV. जन्मार्थेन ।

[62] स्कन्ध omitted in MV.

[63] वचन omitted in MV.

[64] Bod. उपक्लेशना . . . ।

[65] The citation in Bod. ends here.

[66] Cited from this para in S'S. and Bod. pp. 479-483. MV. अथ वा ।

संस्[67]कारप्रत्ययं विज्ञानमिति । [68]विज्ञानसहभुवश्चत्वारोऽरूपिणस्कन्धा[नाम] यच्च रूपं, तद्विज्ञानप्रत्ययं नामरूपमुच्यते । नामरूपविवृद्धया षड्भिरायतनद्वारैः कृत्यक्रियाः प्रवर्तन्ते[69] । तन्नामरूपप्रत्ययं षडायतनमित्युच्यते । षड्भ्यश्चायतनेभ्यः षट्स्पर्शकायाः प्रवर्तन्ते । अयं षडायतनप्रत्ययः स्पर्श इत्युच्यते । यज्जातीयः स्पर्शो भवति तज्जातीया वेदना प्रवर्तते । इयमुच्यते[70] स्पर्शप्रत्यया वेदनेति । यस्तां[71] वेदनां विशेषेणास्वादयति अभि[72]नन्दति अध्यवस्यति अध्यवसाय तिष्ठति । सा वेदनाप्रत्यया तृष्णेत्युच्यते । [73]आस्वादनाभिनन्दनाध्यवसानाध्यवसायस्थानादात्मप्रियरूपसातरूपैर्वियोगो माभूदिति नित्यमपरित्यागाय यैवं प्रार्थना, इदमुच्यते[74] तृष्णाप्रत्ययमुपादानम् । एवं प्रार्थयमानः पुनर्भवजनकं कर्म समुत्थापयति कायेन वाचा मनसा च । स उपादानप्रत्ययो भव इत्युच्यते । [75]तत्कर्म[Tib. 199a]

[67] Omitten in MV.

[68] S'S. एवं नामरूपम् । MV. विज्ञानप्रत्ययं नामरूपमिति वेदनादयोऽरूपिणश्चत्वारः स्कन्धास्तत्र तत्र भवे नमयन्तीति नाम । सह रूपस्कन्धेन च नामरूपञ्चेति नामरूपमुच्यते । Bod. तदेव विज्ञानप्रत्ययं नामरूपम् ।

[69] MV. adds. प्रज्ञायन्ते ।

[70] MV. adds. भिक्षवः ।

[71] S'S. and Bod. यस्तां वेदयति . . . अध्यवस्यति अधिष्ठति । Tib. reads तान् वेदनाविशेषान् . . . omitting यः ।

[72] Bod. अभिनन्दयति ।

[73] Bod. . . . अध्यवसानं आत्मप्रियरूपसातरूपैर्वियोगो मा भवत्विति अपरित्यागो भूयो भूयश्च प्रार्थना । S'S. . . . सानं मा मे प्रियरूपसातरूपै र्वियोगो भवत्विति अपरित्यागो भूयो भूयश्च प्रार्थना . . . । MV. . . . सानस्थानात् . . . अपरित्यागो भवेदिति . . . । Tib. omits नित्य and या ।

[74] MV. adds भिक्षवः ।

[75] S'S. या कर्म . . . सा . . . ।

निर्जातानां पञ्चस्कन्धानामभिनिर्वृत्तिर्या सा भवप्रत्यया जातिरित्युच्यते । [76]जात्याभिनिर्वृत्तानां स्कन्धानामुपचयनपरिपाकाद्विनाशो भवति । तदिदं जातिप्रत्ययं जरामरणमित्युच्यते ।

[77]एवमयं द्वादशाङ्गः प्रतीत्यसमुत्पादोऽन्योन्यहेतुकोऽन्योन्यप्रत्ययो न नित्यो नानित्यो न संस्कृतो नासंस्कृतो [78]नाहेतुको [78]नाप्रत्ययो न वेदयिता[79] न क्षयधर्मो [80]न विनाशधर्मा न निरोधधर्मोऽ[81]नादिकालप्रवृत्तोऽनुच्छिन्नोऽनुप्रवर्तते नदीस्रोतवत् ।

[82]यद्ययं द्वादशाङ्गः प्रतीत्यसमुत्पादोऽन्योन्यहेतुकोऽन्योन्यप्रत्ययो न नित्यो नानित्यो न संस्कृतो नासंस्कृतो नाहेतुको नाप्रत्ययो न वेदयिता न क्षयधर्मो न विनाशधर्मो न निरोधधर्मोऽनादिकालप्रवृत्तो[Tib. 199b]ऽनुच्छिन्नोऽनुप्रवर्तते नदीस्रोतवत्[82] । अथ चेमान्यस्य द्वादशाङ्गस्य प्रतीत्यसमुत्पादस्य चत्वार्यङ्गानि संघातक्रियायै हेतुत्वेन प्रवर्तन्ते । कतमानि चत्वारि । यदुताविद्या तृष्णा कर्म विज्ञानञ्च । [77]तत्र विज्ञानं बीजस्वभावत्वेन हेतुः । कर्म क्षेत्रस्वभावत्वेन हेतुः । अविद्या तृष्णा च क्लेशस्वभावत्वेन हेतुः । तत्र कर्मक्लेशा विज्ञानबीजं [83]जनयन्ति । तत्र कर्म विज्ञानबीजस्य क्षेत्रकार्यं

[76] S'S. and Bod. यो . . . चय . . । Tib. परिपाको विनाशश्च भवति . . ।

[77-77] This para and upto तत्र विज्ञानं in the next para are omitted and contracted by पेयालं in Bod.

[78] Omitted in S'S.

[79] MV. adds नावेदयिता न प्रतीत्यसमुत्पन्नो नाप्रतीत्यसमुत्पन्नो . . . नाक्षयधर्मो . . . नाविनाशधर्मो . . . नानिरोधधर्मो . . . ।

[80] S'S. omits न विनाशधर्म ।

[81] S'S. adds न विरागधर्मः ।

[82-82] Omitted in S'S. MV. reads . . . समुत्पादोऽनुच्छिन्नोऽनुप्रवर्तते नदीस्रोतवत् ।

[83] S'S. and Bod. संजनयन्ति ।

करोति । तृष्णा विज्ञानबीजं स्नेहयति । अविद्या विज्ञानबीजमवकिरति । असतामेषां[84] प्रत्ययानां विज्ञानबीजस्याभिनिर्वृत्तिर्न भवति । तत्र कर्मणो नैवं भवति अहं विज्ञानबीजस्य क्षेत्रकार्यं करोमीति । तृष्णाया अपि नैवं भवति अहं विज्ञानबीजं[85] स्नेहयामीति । अविद्याया अपि नैवं भवति अहं विज्ञानबीजमवकिरोमीति । विज्ञानबीजस्यापि नैवं भवति अहमेभिः प्रत्ययैर्जनितमिति ।

[86]अथ [Tib. 200a] च [87]विज्ञानबीजं कर्मक्षेत्रप्रतिष्ठितं तृष्णास्नेहाभिष्यन्दितमविद्यया स्ववकीर्णं विरोहति । तत्र तत्र उपपत्त्यायतनप्रतिसंधौ मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति । स च नामरूपाङ्कुरो न स्वयंकृतो न परकृतो नोभयकृतो [88]नेश्वरकृतो न कालपरिणमितो न प्रकृतिसंभूतो नचै[89]कैकारणाधीनो नाप्यहेतुसमुत्पन्नः । अथ च मातापितृसंयोगाद् ऋतुसमवायादन्येषां च प्रत्ययानां समवायात्तत्र तत्रास्वादविद्धं[90] विज्ञानबीजमु[90a]पपत्त्यायतनप्रतिसंधौ मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति अस्वामिकेषु धर्मेषु अममेषु अपरिग्रहेषु[91] आकाशसमेषु मायालक्षणस्वभावेषु हेतुप्रत्ययानामवैकल्यात् ।

[84] MV. तेषाम् ।

[85] MV. स्नेहकार्यं करोमीति ।

[86] S'S. and Bod. अपि तु ।

[87] S'S. विज्ञानबीजे . . . ष्ठिते . . . ष्यन्दिते . . . कीर्णे तत्र तत्रोत्पत्त्यायनसन्धौ मातुः कुक्षौ विरोहति । नामरूपाङ्कुरस्याभिनिर्वृत्तिर्भवति । Bod. . . . कीर्णं विरोहति । नाम . . . स्याभिनिर्वृत्तिर्भवति ।

[88] S'S. ईश्वरादिनिर्मितः । Bod. ईश्वरनिर्मितः ।

[89] Tib. omits एक ।

[90] S'S. आस्वादानुप्रविद्धम् । Bod. आस्वादनानुप्र . . . ।

[90a] Bod. तत्र तत्रोपपत्त्या मातुः कुक्षौ . . . . ।

[91] S'S. and Bod. add अप्रत्यर्थिकेषु . . . ।

[92]तद्यथा पञ्चभिः कारणैश्चक्षुर्विज्ञानमुत्पद्यते । कतमैः पञ्चभिः । यदुत चक्षुः प्रतीत्य रूपञ्चालोकञ्चाकाशञ्च [93]तज्जमनसिकारञ्च प्रतीत्योत्पद्यते चक्षुर्विज्ञानम् । तत्र चक्षु[Tib. 200b]र्विज्ञानस्य चक्षुराश्रयकृत्यं करोति । रूपं चक्षुर्विज्ञानस्यालम्बनकृत्यं करोति । आलोकोऽवभासकृत्यं करोति । आकाशमनावरणकृत्यं करोति । तज्जमनसिकारः समन्वाहारकृत्यं करोति । [94]असतामेषां प्रत्ययानां चक्षुर्विज्ञानं नोत्पद्यते । यदा तु चक्षुराध्यात्मिकमायतनमविकलं भवति । एवं रूपालोकाकाशतज्जमनसिकाराश्चाविकला भवन्ति । ततः सर्वेषां समवायात् चक्षुर्विज्ञानमुत्पद्यते[95] । तत्र चक्षुषो नैवं भवति अहं चक्षुर्विज्ञानस्याश्रयकृत्यं करोमीति । [96]रूपस्यापि नैवं भवति अहं चक्षुर्विज्ञानस्याल[97]म्बनकृत्यं करोमीति । आलोकस्यापि नैवं भवति अहं [98]चक्षुर्विज्ञानस्यावभासकृत्यं करोमीति । आकाशस्यापि नैवं भवति अहं चक्षुर्विज्ञानस्यानावरणकृत्यं करोमीति । तज्जमनसिकारस्यापि नैवं भवति अहं चक्षुर्विज्ञानस्य समन्वाहारकृत्यं करोमीति । चक्षुर्विज्ञानस्यापि नैवं भवति अहमेभिः प्रत्ययैर्जनितमिति[99] । [Tib. 201a] अथ [100]च पुनः सत्स्वेषु प्रत्ययेषु चक्षुर्विज्ञानस्योत्पत्तिर्भवति एवं शेषाणामिन्द्रियाणां यथायोगं योज्यम्[101] ।

[92] This para omitted in Bod. by *peyālam.*

[93] S'S. तज्जश्च . . . ।

[94] S'S. असत्सु एषु प्रत्ययेषु ।

[95] S'S. ततः सर्वसमवायच्चक्षुर्विज्ञानस्योत्पत्ति र्भवति ।

[96] MV. adds एवं

[97] S'S. आरम्बण . . . ।

[98] Omitted in S'S.

[99] S'S. जनित इति ।

[100] MV. अथ च सतामेषां प्रत्ययानां समवायात् . . . ।

[101] MV. करणीयम् । S'S. कर्तव्यम् ।

[102]तत्र न कश्चिद् धर्मोऽस्माल्लोकात्परलोकं संक्रामति। [103]अस्ति च कर्मफलप्रतिविज्ञप्तिः हेतुप्रत्ययानामवैकल्यात्। [104]तद्यथा सुपरिशुद्धे आदर्शमण्डले मुखप्रतिबिम्बकं दृश्यते। न च तत्रादर्शमण्डले मुखं संक्रामति। अस्ति च मुखप्रतिविज्ञप्तिः हेतुप्रत्ययानामवैकल्यात्। एवमस्माल्लो-[105]कान्न कश्चित् च्युतो नाप्यन्यत्रोत्पन्नः। अस्ति च कर्मफलविज्ञप्तिः हेतुप्रत्ययानामवैकल्यात्। तद्यथा [106]चन्द्रमण्डलं चत्वारिंशद्योजनशतमूर्ध्वं व्रजति। अथ च पुनः परीत्तेऽभ्युदकभाजने चन्द्रस्य प्रतिबिम्बं दृश्यते। न च चन्द्रमण्डलं तस्मात्स्थानात्[107] च्युतं परीत्त उदकस्य भाजने संक्रान्तं भवति। अस्ति च चन्द्रमण्डलप्रतिविज्ञप्तिः हेतुप्रत्ययानामवैकल्यात्। एवमस्माल्लोका[105]न्न कश्चित् च्युतो नाप्यन्यत्रोत्पन्नः। [Tib. 201^b] अस्ति च कर्मफलप्रतिविज्ञप्तिः हेतुप्रत्ययानामवैकल्यात्[104]।

तद्यथाग्निरुपादान[108]प्रत्यये सति ज्वलति। उपादानवैकल्यान्न ज्वलति। एवमेव कर्मक्लेशजनितं विज्ञानबीजं तत्र तत्रोपपत्त्यायतनप्रतिसन्धौ मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति। अस्वामिकेषु धर्मेषु अममेषु अपरिग्रहेषु[91] आकाशसमेषु मायालक्षणस्वभावेषु[109] हेतुप्रत्ययानाम-

[102] This para and the following are cited in Bod.

[103] Bod. अस्ति कर्मफलमस्ति च विज्ञप्तिः . . . ।

[104–104] Bod. omits this entire example by *peyālam*, and S'S. does so without it. MV. adds भिक्षवः after तद्यथा।

[105] Tib. omits लोक।

[106] MV. adds भिक्षवः।

[107] MV. adds ऊर्ध्वं नभसः।

[108] S'S. . . . उपादानवैकल्यान्न ज्वलति। Bod. reading like S'S., adds: उपादानावैकल्याच्च ज्वलति। Tib. reads: . . . हेतुप्रत्ययवैकल्यान्न . . . हेतुप्रत्ययसामग्र्या ज्वलति।

[109] MV. adds कृत्रिमेषु।

वैकल्यात् । एव[110] माध्यात्मिकस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः ।

तत्राध्यात्मिकः प्रतीत्यसमुत्पादः पञ्चभिराकारैः[111] द्रष्टव्यः । कतमैः पञ्चभिः । न शाश्वततो नोच्छेदतो न संक्रान्तिः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः तत्सदृशानुप्रबन्धतश्चेति । कथं न शाश्वततः । यस्मादन्ये मारणान्तिकाः स्कन्धा अन्य औपपत्त्यंशिकाः स्कन्धाः[112] । न तु य एव मारणान्तिकाः स्कन्धास्त एवौपपत्त्यंशिकाः[112] । अपि तु मारणान्तिकाः स्कन्धा निरुध्यन्ते । [113]तस्मिन्नेव च समय औपपत्त्यंशिका स्कन्धाः प्रादुर्भवन्ति । अतो न शाश्वततः । [Tib. 202^a] कथं नोच्छेदतः । न च [114]पूर्वनिरुद्धेषु [115]मारणान्तिकेषु स्कन्धेषु औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति नाप्यनिरुद्धेषु । अपि तु मारणान्तिकाः स्कन्धा निरुध्यन्ते । [115]तस्मिन्नेव च समये औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति तुलादण्डोन्नामावनामवत्[116] । अतो नोच्छेदतः । कथं न संक्रान्तितः । [117]विस-

[110] This clause omitted in MV. and S'S.

[111] MV., S'S. and Bod. कारणैः ।

[112] Bod. adds प्रादुर्भवन्ति ।

[113] Tib. omits तस्मिन्नेव च समये । Bod. omits this clause : अपि तु . . . S'S. . . . स्कन्धा निरुध्यमाना औपपत्त्यंशिका . . . न्ति ।

[114] S'S. omits पूर्व and मरणान्तिकेषु ।

[115] S'S. omits. तस्मिन्नेव च समये ।

[116] MV. adds. चन्द्रबिम्बप्रतिबिम्बवत् ।

[117] S'S. and Bod., विसदृशात्सत्त्वनिकायाद्धि सभागाः स्कन्धा जात्यन्तरे अभिनिर्वर्तन्ते ।

Tib. विसदृशात् सत्त्वनिकायात् सभागायां जात्यां जातिरभिनिर्वर्तते. L. V. Poussin reports that Tib. of MV. reads with negative : *mgon. par. hgrub par. mi. byed. pao*. (See. MV. p. 569, n. 5.) But our Xylograph has no such reading.

दृशाः सत्त्वनिकायाः सभागायां जात्यां जातिमभिनिर्वर्तयन्ति । अतो न संक्रान्तितः । कथं परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः । परीत्तं कर्म क्रियते । विपुलः फलविपाकोऽनुभूयते । अतः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः । कथं तत्सदृशानुप्रबन्धतः । यथावेदनीयं कर्म क्रियते तथावेदनीयो विपाकोऽनुभूयते । अतस्तत्सदृशानुप्रबन्धतश्च । [118]एवमाध्यात्मिकः प्रतीत्यसमुत्पादः पञ्चभिर्द्रष्टव्यः] ।

[119]यः कश्चिद् भदन्त शारिपुत्र इमं प्रतीत्यसमुत्पादं भगवता सम्यक् प्रणीतमेवं यथाभूतं सम्यक् प्रज्ञया [120]सततसमितमजीवं निर्जीवं यथावदविपरीत [Tib. 202b] मजातमभूतमकृतमसंस्कृतमप्रतिघमनालम्बं[121] शिवमभयमनाहार्यमव्ययमव्युपशमस्वभावं पश्यति [122]असतः तुच्छतः रिक्ततः[123] असारतः [124]रोगतः गण्डतः शल्यतः[124] अघतः अनित्यतः दुःखतः शून्यतः अनात्मतः समनुपश्यति न स पूर्वान्तं प्रतिसरति किं न्वहमभूवमतीतेऽध्वनि आहोस्विन्नाभूवमतीतेऽध्वनि । को न्वहमभूवमतीतेऽध्वनि [125]कथं न्वहमभूवमतीतेऽध्वनि[125] [इति] । अपरान्तं वा पुनर्न प्रतिसरति किं न्वहं भविष्याम्यनागतेऽध्वनि । आहोस्विन्न भविष्याम्यनागतेऽध्वनि । को नु भविष्याम्यनागतेऽध्वनि [125]कथं नु भविष्याम्यनागतेऽध्वनि[125] [इति] । प्रत्युत्पन्नं वा पुनर्न प्रतिसरति किं न्विदं कथं न्विदं के

[118] Tib. S'S. and MV. omit this clause. Thus ends the citation in Bod. MV. also closes its long citation here.

[119] MV. cites this para on p. 593, f. यथोक्तमार्यशालिस्तम्बसूत्रे आर्यमैत्रेयेण महाबोधिसत्त्वेन य इमं प्रतीत्यसमुत्पादं . . . ।

[120] This set of phrases is already referred to on p. 3. See note 7.

[121] MV. and S'S. अनावरणम् ।

[122] S'S. असत्यतः ।

[123] MV. and S'S. ऋक्ततः ।

[124]-[124] S'S. omits these three words.

[125]-[125] S'S. omits this clause.

सन्तः के भविष्यामः[126], अयं सत्त्वः[127] कुत आगतः, स इतश्च्युतः कुत्र गमिष्यतीति । यान्येकेषां[128] श्रमणब्राह्मणानां पृथग्लोके[Tib. 203a] दृष्टिगतानि भविष्यन्ति । तद्यथा आत्मवादप्रतिसंयुक्तानि सत्त्ववादप्रतिसंयुक्तानि[129] जीववादप्रतिसंयुक्तानि पुद्गलवादप्रतिसंयुक्तानि कौतुकमङ्गलवादप्रतिसंयुक्तानि । उन्मिञ्जितानि निमिञ्जितानि च । तान्यस्य तस्मिन् समये प्रहीणानि भवन्ति परिज्ञातानि समुच्छिन्नमूलानि तालमस्तकवदनाभासगतानि आयत्यामनुत्पादानिरोधधर्माणि ।

यो [130]भदन्त शारिपुत्र एवंविधधर्मक्षान्तिसमन्वितः प्रतीत्यसमुत्पादं सम्यगवगच्छति । तस्य तथागतः अर्हन् सम्यक्संबुद्धो विद्याचरणसंपन्नः सुगतो लोकवित् पुरुषदौम्यसारथिरनुत्तरः शास्ता देवमनुष्याणां बुद्धो भगवान् सम्यक्संबोधिं व्याकरोति सम्यक्संबुद्धो बुद्धो भविष्यसीति । मैत्रेयेन बोधिसत्त्वेन महासत्त्वेन एवमुक्तम् ।

अथ [131]खल्वायुष्मान् शारिपुत्रः[Tib. 203b] सदेवमनुष्यासुरगन्धर्वलोकश्च मैत्रेयस्य बोधिसत्त्वस्य महासत्त्वस्य भाषितमनुप्रमोद्य अभ्यनन्दन् ।

आर्यशालिस्तम्बं नाम महायानसूत्रं संपूर्णम्

---

[126] Quotation in S'S. ends here.

[127] Tib. इमे सत्वाः कुत आगताः इतश्च्युताः कुत्र गमिष्यन्ति ।

[128] Tib omits एकेषां ।

[129] MV. omits सत्त्ववाद . . . ।

[130] MV. omits this para.

[131] MV. अथ खलु आयुष्मान् शारिपुत्रो मैत्रेयस्य बोधिसत्त्वस्य महासत्त्वस्य भाषितमभिनन्द्यानुप्रमोद्योत्थायासनात् प्रक्रान्तः प्रक्रान्तास्ते च भिक्षवः ।

[1]प्रतीत्यसमुत्पादादिविभङ्गनिर्देशनामसूत्रम्[2]

नमो रत्नत्रयाय

एवं मया श्रुतम्। एकस्मिन् समये भगवाञ्छ्रावस्त्यां विहरति स्म जेतवने अनाथपिण्डदस्यारामे [3]महता भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः। तत्र भगवानामन्त्रयते स्म प्रतीत्यसमुत्पादस्य वो भिक्षवः आदिं वो देशयिष्यामि विभङ्गञ्च। तच्छृणुत साधु च सुष्ठु च मनसि कुरुत। भाषिष्ये।

प्रतीत्यसमुत्पादस्यादिः कतमः। यदुतास्मिन् सति इदं भवत्यस्योत्पादादिदमुत्पद्यते। यदुताविद्याप्रत्ययाः संस्काराः। संस्कारप्रत्ययं विज्ञानम्। विज्ञानप्रत्ययं नामरूपम्। नाम-[Tib. 204^a] रूपप्रत्ययं षडायतनम्। षडायतनप्रत्ययः स्पर्शः। स्पर्शप्रत्यया वेदना। वेदना-

[1] Vasubandhu calls this Sūtra simply as Vibhaṅga—see his Kos'a, III, 28, (Bhāṣya) p. 55, 5. (N. Dutt's ed.)

The Sanskrit original of this Sūtra is found inscribed in duplicate on two bricks (marked A. and B.) which were dicovered by Mr. J. A. Page in a small votive *stūpa* near the main *stūpa* at Nālanda, and studied by N. P. Chakravarti (*v.* Epigraphia India, XXI, No. 32, Jan. 1932) to which article a note from the Chinese source has been added by Dr. P. C. Bagchi (Ep. Ind. XXI, No. 33). A fragmentary portion of the Sutra is also found inscribed on a *dhvaja*-pillar situated in the Minchou temple five *li* to the south-west of the city of Tunhuang in China and studied by Dr. V. V. Gokhale in a paper "A Brahmi Stone Inscription from Tunhuang" (*v.* Sino-Indian Studies, I, p. 19, ff).

[2] None of the Sanskrit texts has this title; so it is supplied from the Tibetan version of the Sūtra.

[3] This clause is omitted in Tib. version.

प्रत्यया तृष्णा । तृष्णाप्रत्ययमुपादानम् । उपादानप्रत्ययो भवः । भवप्रत्यया जातिः । जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्त्येवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति । अयमुच्यते प्रतीत्यसमुत्पादस्यादिः ।

विभङ्गः कतमः । अविद्याप्रत्ययाः संस्काराः इत्यविद्या कतमा । [4]यत्पूर्वान्तेऽज्ञानम्, अपरान्तेऽज्ञानं पूर्वान्तापरान्तेऽज्ञानम् अध्यात्ममज्ञानं बहिर्धाज्ञानम्, अध्यात्मबहिर्धाज्ञानं कर्मण्यज्ञानं विपाकेऽज्ञानं कर्मविपाकेऽज्ञानं बुद्धेऽज्ञानं धर्मेऽज्ञानं सङ्घेऽज्ञानं दुःखेऽज्ञानं समुदयेऽज्ञानं निरोधेऽज्ञानं मार्गेऽज्ञानं हेतावज्ञानं हेतुसमुत्पन्नेषु धर्मेष्वज्ञानं कुशलाकुशलेषु सावद्यानवद्येषु सेवितव्यासेवितव्येषु हीनप्रणीतकृष्णशुक्लसप्रतिभागप्रतीत्यसमुत्पन्नेषु धर्मेष्वज्ञानं षट्सु वा पुनः स्पर्शायतनेषु यथाभूतसंप्रतिवेधेति । यदत्र तत्र यथाभूतस्याज्ञानमदर्शनमनभिसमयः तमः संमोहः अविद्यान्धकारम् इयमुच्यते ऽविद्या ।

अविद्याप्रत्ययाः संस्कारा इति संस्काराः कतमे । त्रयः संस्काराः कायसंस्काराः वाक्संस्काराः मनस्संस्काराः इति ।

संस्कारप्रत्ययं विज्ञानमिति विज्ञानं कतमत् । [5]षड्विज्ञानकायाः । चक्षुर्विज्ञानं श्रोत्रघ्राणजिह्वाकायमनोविज्ञानम् ।

विज्ञानप्रत्ययं नामरूपमिति नाम [205a] कतमत् । चत्वार अरूपिणः स्कन्धाः । [6]कतमे चत्वारः । वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्कन्धः विज्ञानस्कन्धः । रूपं कतमत् । यत्किञ्चिद्रूपं सर्वं तच्चत्वारि महाभूतानि । चत्वारि च महाभूतान्युपादाय इतीदं च रूपं पूर्वकं च नाम तदैकध्यमभिसंक्षिप्य नामरूपमित्युच्यते ।

[4] Cited in the Abh. Kos'avyā, II, 36, p. 62-3-4 and III, 28, p. 48, 4.

[5] *Ibid.*, III, p. 54, 25.

[6] This clause is omitted in Tib. version.

नामरूपप्रत्ययं षडायतनमिति षडायतनं कतमत्। षडध्यात्मिकान्यायतनानि। चक्षुराध्यात्मिकमायतनं श्रोत्रघ्राणजिह्वाकायमन अध्यात्मिकमायतनम्।

षडायतनप्रत्ययः स्पर्श इति स्पर्शः कतमः। षट् स्पर्शकायाः। चक्षुःसंस्पर्शः श्रोत्रघ्राणचिह्वाकायमनःसंस्पर्शः।

स्पर्शप्रत्यया वेदनेति वेदना कतमा। तिस्रो वेदनाः। सुखा दुःखा अदुःखासुखा च।

वेदनाप्रत्यया तृष्णेति तृष्णा कतमा। तिस्रः तृष्णाः। [205ᵇ] कामतृष्णा रूपतृष्णा अरूप्यतृष्णा च।

तृष्णाप्रत्ययमुपादानमिति उपादानं कतमत्। चत्वार्युपादानानि। कामोपादानं दृष्ट्युपादानं शीलव्रतोपादानमात्मवादोपादानम्[8]।

उपादानप्रत्ययो भव इति भवः कतमः। त्रयो भवाः। कामभवः रूपभवः [9]अरूप्यभवः।

भवप्रत्यया जातिरिति जातिः कतमा। या तेषां तेषां सत्त्वानां तस्मिंस्तस्मिन् सत्त्वनिकाये जातिः संजातिरवक्रान्तिरभिनिर्वृत्तिः प्रादुर्भावः स्कन्धप्रतिलाभो धातुप्रतिलम्भः आयतनप्रतिलम्भः स्कन्धानामभिनिर्वृत्तिः जीवितेन्द्रियस्य[प्रादु]र्भावः।

जातिप्रत्ययं जरामरणमिति जरा कतमा।

[10]यत्तत्खालत्यं पालित्यं वलीप्रचुरता जीर्णता भुग्नता कुब्जगोपानसीवङ्कता तिलकालकाचितगात्रता खुळखुळप्रश्वासकायता पुरतः [206ᵃ]

[7] *Ibid.*, III, p. 55.

[8] A adds here च.

[9] A. : आरूप्य.

[10] Cp. Maj. I, 88 where jarā is described जिण्णं गोपानसिवङ्कं भोग्गदण्डपरायणपवेधमानं गच्छन्तिं आतुरं गतयोब्बनं खण्डदन्तिं पलितकेसिं विलूनं

प्राग्भारकायता दण्डविष्कम्भणता धन्धत्वं मन्दत्वं हानिः परिहाणिः इन्द्रियाणां परिपाकः परिभेदः संस्काराणां पुराणीभावः जर्जरीभावः इयमुच्यते जरा ।

मरणं कतमत् । या तेषां तेषां सत्त्वानां तस्मात्तस्मात्सत्त्वनिकायात् च्युतिः च्यवनतः भेदोऽन्तरहाणिः आयुषो हाणिः ऊष्मणो हाणिः जीवितेन्द्रियस्य निरोधः स्कन्धानां निक्षेपो मरणं कालक्रिया इदमुच्यते मरणमिति । इदं च मरणं पूर्विका च जरो तदुभयमैकध्यमभिसंक्षिप्य जरामरणमित्युच्यते । अयमुच्यते प्रतीत्यसमुत्पादस्य विभङ्गः ।

प्रतीत्वसमुत्पादस्यादिं वो देशयिष्यामि इति विभङ्गञ्च इति वो यदुक्तमिदमेतत्प्रत्युक्तम् । [11]इदमवोचद्भगवानात्तमनसस्ते भिक्षवो भगवतो भाषितमभ्यनन्दन्निति ।

[12]प्रतीत्यसमुत्पादादिविभङ्गनिर्देशनामसूत्रं समाप्तम्

खलितसिरं वलिनं तिलकाहतगत्तिं (भरिंग पस्सेय्य) । Similar description is also made in the Mahāniddesa I, 120-121 : जरसा जिण्णो होति वुद्धो खण्डदन्तो पलितसिरो विलूनं खालितसिरो वल्लीनं तिलकाहतगात्रो वङ्को भग्गो दण्डपरायणो . . . . ।

[11] This clause is omitted in Tib. version.

[12] A. : प्रतीत्यसमुत्पादः समाप्तः ।

आर्यप्रतीत्यसमुत्पादनाममहायानसूत्रम्

[f. 206b]नमः सर्वबुद्धबोधिसत्त्वमहासत्त्वेभ्यः

एवं मया श्रुतम् । एकस्मिन् समये भगवान् त्रयस्त्रिंशानां देवानां मध्ये विहरति स्म [1]पाण्डुकम्बलकल्पे [2]शिलातले [3]जिताश्वादिमहाश्रावकैः आर्यमैत्रेयार्यावलोकितेश्वरवज्रहस्तादिभिः बोधिसत्त्वमहासत्त्वैः अप्रमेयगुणरत्नालङ्कृतैः महाब्रह्म[4]सहांपति [5]नारायणमहे[6]श्वरादिभिर्देवैः शक्रेण[7] देवानामिन्द्रेण गन्धर्वराजेन [8]पञ्चशिखेन च सार्धम् । अथावलोकितेश्वरो बोधिसत्त्वो महासत्त्वः उत्थायासनाद्[9] एकमंसमुत्तरासङ्गं[10] कृत्वा दक्षिणं जानुं मेरुपृष्ठेऽवष्टभ्य येन भगवान् तेन अञ्जलिं प्रणम्य भगवन्तमेतदवोचत् । एते हि भगवन् देवाः [11]चैत्यनमस्क्रियामण्डनाः [f. 207a]

[1] Tib. Ad. mo. nig. lta. buhi. But the Xyl. reads: ar. mo . . . .
See Avadānaśataka, II, p. 90 पाण्डुकम्बळशिलायां . . . .;
Av. kalpalatā, 14, 2: पाण्डुकम्बळाख्ये शिलातले . . . .;
Rāmāyaṇa, II, 89 12: . . . . पाण्डुकम्बळसंवृताम् ।
—गुहो नावमुपारुहत् ।

[2] *rdo. leb. la.*

[3] *rta. thul*; cf. जितेन्द्रिय *dbaṅ. thul.*

[4] mi. mjed. kyi. bdag. po.

[5] sred. med. kyi. bu.

[6] dbaṅ. phyug. chen. po.

[7] brgya. byin.

[8] gtsug. phud. lṅa. ba.

[9] stan.

[10] bla. gos.

[11] mchod. rten. bgyid. par. htshal. ba. śa. stags | mchod. rten = caitya | śa. stags = śa. mtshan ≠ lucky or unlucky marks on the body, अङ्गमणि. (Sarat Chandra Das).

एतत्परिषन्मण्डलपतिताः [12]कथमपि [13]ब्रह्मचर्यपुण्यप्रसवाः सदेवके समारके सब्रह्मके लोके सश्रमणब्राह्मणप्रजासु[14] भिक्षुभिक्षुण्य उपासकोपासिकाः सुबहुलपुण्यप्रसवाः तथा तथा भगवतो धर्मदेशनां याचन्ते । इति ।

तदा भगवान् प्रतीत्यसमुत्पादगाथामवोचत् ।

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषाञ्च यो निरोध एवंवादी महाश्रमणः ॥

यदिदमवलोकितेश्वर अयं प्रतीत्यसमुत्पादस्तथागतानां धर्मकायः । यः प्रतीत्यसमुत्पादं पश्यति स तथागतं पश्यति । यश्चावलोकितेश्वर कुलपुत्रः कुलदुहिता वा श्रद्धासमन्वितः अप्रतिष्ठिते देशे [f. 207b] [15]आमलकमात्रं चैत्यं सूचीमात्रं बोधिवृक्षं[16] वकुलपुष्पमात्रं छत्रं कृत्वा प्रतीत्यसमुत्पादधर्मधातुगाथां पठति स [17]ब्रह्मपुण्यं प्रसवति । इतः प्रच्याव्य मरणकालं कृत्वा ब्रह्मलोके उत्पद्यते । ततः प्रच्याव्य कालं कृत्वा शुद्धावासकायिकानां देवानां [18]सभव्यतया उत्पद्यते ।

भगवता एवमुक्ते ते श्रावकाः ते च बोधिसत्त्वमहासत्त्वास्सर्वावच्च तन्मण्डलं सदेवमनुष्यासुरगन्धर्वलोकश्च भगवतो भाषितमनुप्रमोद्याभ्यनन्दत् ।

आर्यप्रतीत्यसमुत्पादनाममहायानसूत्रं संपूर्णम्

---

[12] ci. nas.

[13] tshaṅs. pa = tshaṅs. par. sbyod. pa ?

[14] skye. dgu. las.

[15] skyu. ru. rahi. hbru = आमलकधान्य.

[16] srog. s'iṅ = life-tree = bla. zhiṅ. Belief about this, see Saratchandra Das, pp. 901, 1296.

[17] tshaṅs pahi. bsod. nams.

[18] Or सभागतया = skal. pa. mñam. par.

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषाञ्च यो निरोध एवंवादी महाश्रमणः [19] ॥
सर्वपापस्याकरणं कुशलस्योपसंपदा ।
स्वचित्तपरिदमनुमेतद्बुद्धानुशासनम् [20] ॥

शुभमस्तु सर्वजगताम् [f. 207^b l. 7]

---

[19] The same Gāthā as cited above in the body of this Sūtra.

[20] Pali original in the Digha Nikaya II, 14 runs:
सब्बपापस्स अकरणं कुसलस्स उपसंपदा ।
सचित्तपरियोदपनं एतं बुद्धानुसासनम् ॥

ADDITIONAL NOTES

P. 1. l. 4. Caṅkrama is a place where a monk walk in circuit while reciting some *dhāraṇī*, a prayer; cp. Bharṭrahari's verse: चङ्क्रमाणोऽधीष्वात्र जपंश्चक्रमणं कुरु। cited in the M. Bhāṣya, Vol. II, p. 247, (Bombay edition). A reference to Buddha's cankama at Sarnath is made in the Inscription in the third year of Kaniṣka, see Ep. Ind. VIII, p. 176.

l. 8. Cp. Maj. I. 28, Mahāhatthipadopama Sutta, p. 191, ll. 1, 26-27: वुत्तं पनेतं भगवता यो पटिच्चसमुप्पादं पस्सति सो धम्मं पस्सति। यो धम्मं पस्सति सो पटिच्चसमुप्पादं पस्सति।—a discourse by Sāriputta. Note Dhamma in this passage is not the eight-fold path as understood in the S'ālīstamba Sūtra; Sam. III. 120: यो धम्मं पस्सति स मां पस्सति। यो मां पस्सति स धम्मं पस्सति। cp. Itivuttaka, § 92. See L. V. Poussin, Notes sur les corps du Buddha in Le Museon, 1913 pp. 259-290.

P. 8. 14. नडकलापयोगेन, cf. M. Nidāna Sutta, Dig. II, 55; Sam. I; Oldenberg, Buddha, p. 230; Abh. Kos'avyā—(ed. Vogihara), VIII, p. 667, 31: नडकलापीद्वयवत् नामरूपयोरन्योन्यनिश्रितवचनात्. Yasomitra cites some passages from a Sūtra: तद्यथायुष्मन् द्वे नडकलाप्याकाशे

उच्छ्रिते स्याताम्। ते अन्योन्यनिश्रिते अन्योन्यं निश्रित्य तिष्ठेयाताम्। तत्र कश्चिदेकामपनयेत्। द्वितीया निपतेत्। द्वितीयामपनयेत्। एका निपतेत्। एवमायुष्मन् शारिपुत्र नामश्च रूपश्चान्योन्यनिश्रितम्। अन्योन्यं निश्रित्य तिष्ठतीति विस्तरः। p. 668, 1-6. Nāgārjuna also uses this simile in his Pratītyasamutpāda-hṛdaya *ad* ver. 1.

P. 12, 9. Cp. Maj. I, p. 267: या वेदनासु नन्दी तदुपादानम्।

P. 15, 2. Cp. Maj. I, pp. 190-191: Where the mention is made only of the three: Cakkhu, rūpa and manasikāra.

P. 16, 12. Maj. I, (72) p. 487: अग्गि तिणकट्ठुपादानं पटिच्च जलति। etc. Upadanasutta, Sam. II, 84, fully developed simile.

P. 18, 10-12. असतः .... समनुपश्यति। Cf. Maj. I, (64) p. 435, 32-34 and p. 436, 30-32.

P. 18—p. 19, 2: पुब्बन्तं अपरन्तं पच्चुप्पन्नं are detailed exactly in similar terms in Maj. I, p. 265, 1-17.

P. 19, 4. Cp. Maj. I, 265, 25. यानि तानि पुथुसमणब्राह्मणानं वतकोतूहलमङ्गलानि ....।

P. 19, 6. Cp. Maj. I, (72) p. 487: .... उच्छिन्नमूलं तालावत्थुकतं अनभावकतं आयतिं अनुप्पादधम्मं ...। and p. 250: सेय्यथा अग्गिवेसन तालो मत्थकाच्छिन्नो अभब्बो पुनविरुळिया, एवमेव खो अग्गिवेसन ये आसवा संकिलेसिका पोनोभविका सदारा दुक्खविपाका आयतिं जातिजरामरणीया पहीणा उच्छिन्नमूला तालावत्थुकता अनभावकता आयतिं अनुप्पादधम्माति।

P. 26, 5. This gāthā is said to have been uttered by As'vajit to Sāriputra, see Vin. ed. Oldenberg I, p. 40 and his Buddha, p. 135 for the narrative of when As'vajit uttered this verse. I-tsing says that the gāthā has been put on the images or under the Caityas of the Buddha, v. his Records, p. 150, some details of Buddha's image worship. Haribhadra gives definition of the Stūpa as a place where this verse is deposited; v. his Abh. Āloka, GOS. p. 179.

In the early period of the Buddhist art represented in Sanchi, Bharhut and Buddagayā Buddha was never portrayed in human form, his presence being indicated by a symbol or empty throne. Images of the Buddha began to be erected in the first century A.D. in North-West India and Mathura under foreign influence. A tradition is recorded by I-tsing that Kaniṣka engraved some Buddhist scriptures composed by the fourth Bud. Council on some copper sheets, deposited them in a stone receptacle and built a Stupa over it. *v.* Beal, Bud. Records of the Western World, I, as noticed in the Guide to Nalanda of A. Ghose, p. 36, and see Ibid., p. 24.

An inscription on the Buddha image from Muthurā records during the reign of

Huviṣka in the 51st year of the Kuṣāna era the erection of the image by a Bhikkhu named Buddhavarman in the temple built by the king himself, ... बुद्धवर्मण: प्रतिमा प्रतिष्ठापिता सर्वबुद्धपूजार्थम् . . . । *v.* Ep. Ind. X, p. 113.

J. Ph. Vogel, discussing on some Inscriptions of the third year of Kaniṣka on the Bodhisattva statue from Mathurā concludes thus: " This fact not only confirms the theory that the practice of making Buddha images originated from the North West, but also indicates that the flourishing period of the Gandhara School must be anterior to Kaniṣka's reign. We should be led to the conclusion that Graeco-Buddhist school of Gandhara flourished not under the Kaniska kings but under the earlier Yavana and Saka rulers." (Ep. Ind. VIII, p. 178).

It is interesting to note that this gāthā in its Pali version is found engraved on the two Maugyun Gold Plates discovered in a brick by some people who were digging foundation for a new Pagoda at Maugyun village near Hmawza in the Prone district. They are written in characters which, it is believed, were in vogue in the 1st century A.D., (see Ep. Ind. V, p. 101). The Pali version of the gāthā is also found on a slab

containing some conventional representations of scenes of the Buddha's life. The characters of 3rd or 4th century A.D. (Ep. Ind. IX, p. 291).

P. 26, 10. The gift of *chatra* to Chaitya in the Amaravati Inscriptions, see Luders' list in Ep. Ind. X, p. 152, No. 1276. Similar in nature is *unisa*, coping-stone to Chaitya, Ibid., No. 1281.

COMPARATIVE NOTES

S'ĀLISTAMBA SŪTRA: CHINESE VERSION COMPARED

Name of the Translator is lost. The Chinese text used here is the latest Nanking edition of the Sūtra with one Chinese commentary.

P. 1, l. 4. The Chinese equivalent is *ching-hsing*.

l. 5. Chinese omits 'बहुविधां'

l. 7. Chinese reads simply अथ *chin-shih* omitting "सूत्रं".

P. 2, l. 1. सुगतः कस्मादेवमवोचत । कथमिदं (or तत) वस्तु । for सुगतोक्तसूत्रान्तार्थः कतमः ।

P. 3, ll. 10-11. निर्वाणफलकः for फललाभनिर्वाणैकसंगृहीतो धर्मः ।

l. 12. The word आर्य is omitted in आर्यप्रज्ञानेत्रः ।

l. 12. बोधिक्रिया is added before शैक्षाशैक्ष . . . . ।

l. 15. अव्यय is omitted as in Tib.

l. 16. एवं धर्ममपि सततसमितम्—

P. 4, l. 1. This sentence is made easier in Chinese सम्यग्ज्ञानलाभात उत्तमधर्ममभिसंबुध्य अनुत्तरधर्मशरीरेण बुद्धं पश्यति ।

l. 2. तस्मात प्रतीत्यसमुत्पाद (lit. हेतुप्रत्यय) धर्मः—

l. 3. तत्प्रत्ययजफलम् for इदं प्रत्ययताफल्मू .

ll. 4-5. "एषां धर्माणाम्" "येषा" omitted.

ll. 5-6. प्रतीत्यसमुत्पादोपनिबन्धनता for प्रतीत्यसमुत्पादसमता, अविपरीतता for अविपरीततथता, अनन्यता for अनन्यतथता.

l. 12. "गण्डः । गण्डात्" omitted as in Tib.

P. 5, l. 2. तथापि for अथ पुनः

l. 3. "प्रादुर्भावः omitted.

l. 9. After . . . समवायात् is added : बाह्यः प्रतीत्यसमुत्पादो भवति । एवं . . .

P. 6, ll. 2, 5. तथापि for अथ पुनः ।

l. 4. न स्वपरकृतः for नोभयकृतः

l. 5. "नैककारणाधीन" omitted as in Tib.

l. 11. निरुद्धे बीजे for निरुद्धात् . . . . . ।

l. 12. बीजे निरुध्यमाने अङ्कुर उत्पद्यते for बीजं पुनर्निरुध्यते । तदैवाङ्कुरश्चोत्पद्यते ।

l. 14. 'बीजात्' is omitted as in Tib.

l. 16. Chinese gives the same explanation for कथं न सङ्क्रान्तितः as Tib. does.

P. 7, l. 1. परीत्ताद्बीजात् विपुलं फलमभिनिष्पद्यते for परीत्तं . . . अभिनिर्वर्तयति ।

l. 15. तथापि for अथ च.

P. 8, l. 2. 'प्रादुर्भाव' is omitted again.

l. 8. पृथिवीधातुलक्षणं for पृथिवीधातुः

l. 14. नडकलापयोगेन is rendered into Chinese as : नडकलापबन्धवत् = 'like the binding or joining by a madder" (?)

l. 15. Chinese supports the reading असत्सु for असताम् .

P. 9, ll. 8, 14. मानव is rendered 'कर्तृ'.

l. 8. अहम् is rendered ईश्वर or प्रभु *Su-tasi.*

P. 10, l. 3. Chinese adopts the much simplified reading as in Tib. : विज्ञानसहभुवश्चत्वार उपादानस्कन्धास्तन्नामरूपम् .

l. 7. पुनर्भव is omitted in पुनर्भवजनक.

l. 8. Chinese supports Tib. reading : तद्धेतुक for भवहेतुक.

l. 9. संमूढस्य is omitted.

ll. 10-11. Chinese reads simply : पञ्चविज्ञानकायदुःखानुभवनं दुःखम् .

ll. 11-12. मनसिकारमनोविज्ञानसर्वदुःखानुभवनं दौर्मनस्यं for मनसिकार-संयुक्त etc.

P. 11, l. 3. जन्मद्वार for आयद्वार as in Tib.

l. 6. Chinese adds स्कन्ध before विनाश. वचन is omitted in वचनपरिदेवन as in MV.

ll. 11-13-p. 12, l. 1. After पुण्योपगमेव विज्ञानं भवति is added : इमे अविद्याप्रत्ययाः संस्कारा इत्युच्यन्ते । After अपुण्योपगं . . . भवति is added : तत् संस्कारप्रत्ययं विज्ञानमुच्यते । After आनेञ्ज्योपग . . . भवति is added : तत् विज्ञाननामरूपमुच्यते ।

P. 12. ll. 1, 2. विज्ञानसहभुवः . . . . . . नामरूपमुच्यते ' is omitted.

l. 7. 'अध्यवसाय तिष्ठति ' is omitted.

l. 9. ' नित्यमपरित्यागाय यैवं ' is omitted.

l. 11. [यत्] तत्कर्मनिर्जाताः स्कन्धाः

P. 13, l. 1. सा . . . जातिरित्युच्यते ।

l. 8. तथापि for यदि.

ll. 11-12. चत्वारि अङ्गानि द्वादशाङ्गप्रतीत्यसमुत्पादधर्मान् संघ्नन्ति for इमान्यस्य . . . . हेतुत्वेन प्रवर्तन्ते ।

l. 15. कार्य in क्षेत्रकार्य is omitted.

P. 14, l. 8. ' विरोहति ' is omitted.

l. 9. प्रतिसन्धि is omitted.

l. 11. मातापितृसंयोगे for . . . संयोगात् .

l. 12. ऋतोरन्येषां . . . समवाये for समवायात् .

l. 14. अस्वामिन् is rendered निरात्मक. निरहं मम for अमम. अपरिग्रह is omitted. ते मायाधर्माः for मायालक्षणस्वभाव.

P. 15, ll. 2, 12. मनसिकार for तज्जम°.

ll. 3, 9. आश्रित for आश्रयकृत्य.

ll. 4, 10. आलम्बन for आलम्बनकृत्य.

l. 13. समन्वाहृत for समन्वाहारकृत्य. ' तस्य ' is added before चक्षुर्विज्ञानस्य.

l. 14. भूत or भवामि for जनित. अथ च=तथापि.

l. 15. यावत् for एवम्.

P. 16. l. 1. एवं for तत्र. तथापि is added before अस्ति च . . .

l. 6. द्विचत्वारिंशद्योजनशत for चत्वारिंशत°.

l. 7. 'अथ च पुनः' is omitted. तस्य is added before चन्द्रस्य.

l. 8. तत् before चन्द्र°. 'स्थानात्' is omitted.

l. 12. अग्निः हेतुप्रत्ययवैकल्ये (lit. हेतुप्रत्ययेषु विकलेषु) न ज्वलति। हेतुप्रत्ययसामग्र्यां (lit. संपत्तौ) ज्वलति। which reading almost agrees with Tib. *v.* foot-note 108.

ll. 14-15. The same different readings as noted on p. 14, l. 14 above. कर्मक्लेशजनित is the epithet to नामरूपाङ्कुर in Chin.

P. 17, l. 5. Chinese simply reads तत्सदृशतः for °अनुप्रबन्धतः

l. 8. 'तस्मिन्नेव समये' is omitted.

l. 10. पूर्व in पूर्वनिरुद्ध is omitted as in S'S.

P. 18, l. 1. सत्त्वाः विसभागात् स्थानात् सभागं स्थानमभिनिर्वर्तयन्ति for विसदृशाः सत्त्वनिकायाः etc.

l. 4. 'कथं तत्सदृशानुप्रबन्धतः' is omitted as in Tib. यथा कृतः हेतुः तथा (lit. तत्) फलमनुभूयते for यथावेदनीयं कर्म etc.

ll. 7-8. तथागतेन प्रोक्तं for भगवता . . . प्रीणीतम्.

l. 8. 'एवं यथाभूतं' and 'सततसमित' are omitted.

l. 12. सदानुपश्यति for समनुपश्यति. Construe the sentence सम्यक्प्रज्ञया समनुपश्यति।

ll. 13-14. 'कोऽन्वहमभूवमतीतेऽध्वनि कथं न्वहमभूवमनागतेऽध्वनि' is omitted.

